M. T. B. COLLEGE, SURAT

Manuscripts Library

Jaina

No. Ref.

Ser. 1375

Title: Mrtyunjaya Vidhan

1375

In Complete

Mrutyunjaya Vidhan : Title

: Author

: Editor

81C : Year, Vols.

: Publisher

1375 : Remarks

श्रीगणेशायनमः॥ अथमृत्युंजयविधानं॥ वसिष्ठकल्पोक्तं लिख्यते॥ आचम्यप्रा
णानायम्यतिथ्यादिकंस्मृत्वा॥ ममजन्मांतरोपार्जितपापमृत्युज्वरादिसमस्ता
मयनिबर्हणार्थं श्रीमृत्युंजयदेवताप्रीत्यर्थं संजीविनीजपमहंकरिष्ये॥ तत्रा
दौआसनबंधादि भूतशुद्धिप्राणप्रतिष्ठांकुर्यात्॥ मृत्युंजयजपाकार्यः॥ पृ
थिव्यामेरुपृष्ठऋषिः कूर्मोदेवतासुतलंछंदः॥ आसनेविनियोगः॥ पृथ्वित्व
याधृतालोकादेविलंविष्णुनाधृता॥ त्वंचधारयमांदेवीपवित्रंकुरुचासनं॥
इतिमंत्रेणकुशाजिनोर्णवस्त्राणिभेदैरासनंविस्तीर्य॥ पृथ्व्यैनमः॥ आ
धारशक्त्यैनमः॥ [?]क्तत्यैनमः॥ इत्यासनंसंपूज्य॥ मूलमंत्रेणशिखामाब
ध्य॥ आत्मानंदिव्यदेहस्यावलोकनंनकुर्यात्॥ ॐ फट्॥ अस्त्रायफट्इतिजल
प्रक्षेपणंनांतरिक्षाय॥ अपसर्पंतुयेभूताये भूताभूमिसंस्थिताः॥ येभूता
विघ्नकर्तारस्तेनश्यंतुशिवाज्ञया॥ अपक्रामंतुभूतानिपिशाचाः।

सर्वतोदिशं॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभेत॥ इति मंत्राभ्यां वामपादपार्ष्णि
घातत्रयेण सौमान्निर्भायनुत्तायनुत्तार्मं सर्वभूतनिवारणाय शार्ङ्गायशस्त्रारा
१ जायास्त्रराजाय सुजाय सुदर्शनाय हुं फट् इति छोटिकाभिस्तालत्रयेण च दिग्ब
धं विधाय मूलमंत्रेण करशुद्धिं कुर्यात्॥ श्रीगुरुभ्यो नमः। परमगुरुभ्यो नमः। प
रात्परगुरुभ्यो नमः॥ परमेष्ठीगुरुभ्यो नमः॥ इति मूल[illegible]गुरुं नत्वा भूतशुद्धि
मारभेत॥ तद्यथा॥ हृद्याद्दीपकलिकाकारां जीवकलां हंसमंत्रेणांकुश
मुद्रया ब्रह्माण्डस्थितसहस्रदलपद्मान्तर्गतशिवेन संयोज्य॥ ॐ ह्रां सद्योजा
तायनिवृत्तिकलात्मने हुं फडिति पादादिजान्वोः॥ ॐ ह्रीं वामदेवाय प्रति
ष्ठाकलात्मने हुं फडिति जान्वादिगुह्ये॥ ॐ ह्रूं अघोराय विद्याकलात्मने हुं
फडिति गुह्यादिहृदये॥ ॐ ह्रैं तत्पुरुषाय शान्तिकलात्मने हुं फडिति हृद १
यादिवदने॥ ॐ ह्रौं ईशानाय शान्त्यतीतकलात्मने हुं फडिति वदनादि

मूर्ध्नि न्यसेत्॥ एवं भूतान्युपशाम्य जन्मादिदुःखप्रदं पापपुरुषं वामकुक्षौ विचिं
तयेत्॥ यथा॥ ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयं॥ सुरापानहृदायु
क्तं गुरुतल्पकटिद्वयं॥ तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं॥ उपपातकरोमा
णं रक्तश्मश्रुविलोचनं॥ अचेतनमधोवक्त्रं दग्धपापादसंनिभं॥ खड्गच